Not secure | sanskritarticle.com

ISSN No.: 2454-9177
Impact Factor (RJIF): 5.11
Author's Helpline: +91-8368241690
Download Krutidev Fonts

# National Journal of Hindi & Sanskrit Research

मुखपृष्ठ | सामान्य निर्देश | शोध अंक | सम्पादकीय परिषद | प्रमाणपत्र | Publication Ethics | Peer Review & Policy | संपर्क

हमारे बारे में | सामान्य निर्देश | सम्पादकीय परिषद | शोध क्षेत्र

Type here to search

Scanned by CamScanner

ISSN NO. 2454-9177

# National Journal of Hindi & Sanskrit Research

Volume 17 (March-April , 2018).

Scanned by CamScanner

ISSN: 2454-9177
NJHSR 2018; 1(17): 68-69
© 2018 NJHSR
www.sanskritarticle.com

Dr.Satrughna Panigrahi
Assistant Professor, Dept.of Veda,
Shri Somnath Sanskrit University,
Veraval, Gujarat

# वास्तोष्पतिविज्ञानम्

**Dr.Satrughna Panigrahi**

विशेषज्ञानं विज्ञानम्। विशेष इति नाम्न: अर्थो भवति अनुभूति:। सत्वप्रधानतया यत् किमपि अनुभूयते तद् विज्ञानम् । आधुनिकैतिहासकाराणां मतानुसारं वेदाः वर्तमानकालात् चतु:सहस्रं पञ्चसहस्रं वा वर्षपूर्वं कथिता: सन्तीति। भारतीयपरम्परायां वेदानामाविर्भाव: मानवसृष्टे: प्रारम्भतः मन्यते। वैदिकपरम्परानुसारं मानवसृष्टि: अद्यत: लक्षाधिकवर्षपूर्वं मन्यते। अयञ्चास्तिविषय: विचारस्य। अतोहं प्रतिपादयितुनिच्छामि मन्त्रविज्ञानस्य देवताविज्ञानस्य वा विषये । परन्तु वयं कथयितुं शक्नुम: यत् तस्मिन् प्राचीनकालेपि वर्तमानज्ञानसाधनानि आसन् तदापि तत्सर्वमन्विष्टजातमासीत्। ऋग्वेदीयानां सूक्तानां देवतास्तुतिरूपत्वात् तत्प्रतिपाद्यो विषय: प्राधान्येन देवताविज्ञानतत्वमेव । देवताविज्ञानतत्वाख्यानेऽप्यत्र महती श्रद्धा कर्तव्या भवति, यतो हि साहित्यान्तरदुरवापा: प्राक्कालिका भावनाविशेषास्ततोऽधिगन्तुं शक्या:। अपि च येन प्राकृता: पदार्था: देवताविज्ञानं प्रापिता: सोऽयं चेतनधर्मारोपप्रकारस्ततो व्यक्तीभवति। ऋग्वेदोपवर्ण्यमाना: सूर्याग्निवायुप्रभृतय उत्कृष्टवर्गीया देवता: सर्वा: प्राकृता एव पदार्थाश्चेतनधर्मारोपेण कल्पिता:। प्राक्कालादागता: काश्चित्विहाय सर्वा अपि देवता: शरीरयुक्तत्वेन वर्णिता: । प्रतिपादितेषु देवेषु वास्तोष्पति: अन्यतम:।

सम्यगुक्तमिति सूक्तं नाम यत्र कस्यचिद्देवस्य महिमा वर्णितो भवति । अत्र वास्तोष्पते: महिमा वर्णित:। वास्तोष्पति: नाम गृहपालको देव: । यस्मिन् गृहे जना: निवसन्ति तेषां जनानां जीवनरक्षणं स्वास्थ्यरक्षणं समृद्धिरक्षणञ्चायं देवो विदधाति । अयं देव: पितेव जनानां पालनं करोति पोषणञ्च करोति ।यथा[1]-

> वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिंदो ।
> अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जुषस्व ॥

ऋग्वेदे अस्य वास्तोष्पते: केवलं पञ्च एव मन्त्रा: प्राप्यन्ते । " वास्तु " शब्द: निवासार्थकात् " वस् " धातो: निष्पन्न: यस्यार्थो भवति गृहम् । वस् धातो: बहवोऽर्था: वर्तन्ते । यथा निवासार्थे, उदादिगणे आच्छादनार्थे, चुरादौ च स्नेहेच्छापहरणार्थेषु प्रयुक्तो दृश्यते । निवसति, आच्छादयति, स्निह्यति, इच्छति, अपहरति तापमस्मिन्निति वास्तु । कस्याऽपि गृहनिर्माणस्य पूर्वं तदधिष्ठातृवास्तुपुरुषस्य प्रकल्पनमपि वास्तुशास्त्रस्य एकोऽनिवार्यसिद्धान्त: । वासयोग्यभूमि: वास्तु: इति कथ्यते । योग्यता चात्र न केवलं प्राणिनामपि च देवानां निवासमाधारीकृत्य गृह्यते। पौराणिकवचनानुसारं प्राचीनकाले अन्धकासुरस्य वध: शिवेन कृत: । तदा युद्धोत्पन्नै: शिवस्य स्वेदविन्दुभि: विकरालपुरुषस्य उत्पत्तिर्जाता । स एव तपसा सदाशिवात् वरं प्राप्य त्रैलोक्यमाच्छादयन् भूमावपतत् । तस्याङ्गेषु यत्र यत्र देवा आक्रान्ता आसन् तेषां वासोऽपि तेष्वेव स्थानेष्वभवत् । अत: देवानां निवासविषयश्च मत्स्यपुराणे वास्तुनिरुपणाध्याये स्फुटीकृत: । यथा-

Correspondence:
Dr.Satrughna Panigrahi
Assistant Professor, Dept.of Veda,
Shri Somnath Sanskrit University,
Veraval, Gujarat.



Scanned by CamScanner

येन यत्रैव चाक्रान्तं स तत्रैवावसत्पुन:।
निवासात् सर्वदेवानां वास्तुरित्यभिधीयते ॥[2]

अत: वास्तु इति नाम गृहम् एवञ्च " पति:" नाम " पा " अथवा पालनार्थकात् " पाल् " धातो: निष्पन्न: यस्यार्थ: पालक: रक्षको वा ज्ञायते । गृहपति: ब्रह्माण्डरूपं देहरूपञ्च गृहम् तस्य पालक: रक्षक: परमात्मा वा वास्तुकलाविशेषज्ञ: शिल्पी वास्तोष्पति: इत्यर्थो भवितुमर्हति॥ श्रूयते निरुक्ते यथा- "वास्तुर्वसतेर्निवासकर्मण: तस्य पाता वा पालयिता वा"[3] इति ।

अयं वृक्षाणां पर्वतानामपि देव: स्मृत: । गृहनिर्माणे येषां वस्तूनामुपयोग: करणीयो भवति तत्र वास्तोष्पतेरनुमतिरनिवार्या भवति । ऋग्वेदे अस्य देवस्य मन्त्रे लिखितम् यत् हे वास्तोष्पते ! अस्माकं धनस्य पशूनाञ्च वृद्धिं कुर्यात् तथा अस्मान् वार्धक्यात् पाहि तथा गृहोपयोगिवस्तूनां न्यूनता माऽस्तु । अत्रेत्थमपि लिखितम् यत् समृद्धिकामनायै देवोऽयमुपास्य इति ॥[4] हे वास्तोष्पते! त्वमेव गृहपालको वर्तसे , त्वमेव रोगनाशक: नाम स्वास्थ्यप्रदो वर्तसे , तव बहूनि रूपाणि सन्ति, तानि वैविध्यपूर्णानि रूपाणि धृत्वा त्वम् अस्माकं सुहृद् भूत्वा क्षेमकरो भव इति[5]

ऐतिहासिकवचनानुसारम् आदिमानवा: आदौ वने पर्वतगुहासु च निवसन्ति स्म । क्रमश: तेषां चिन्तनं गृहनिर्माणविषये अभूत् । अनन्तरं स्वात्मरक्षार्थं परोपकारार्थं च गृहाणि चक्रु: । तदनन्तरं गृहे स्थितानां जनानां चतुष्पदीयगवाश्वादीनां च पालनार्थं सुखप्रदानार्थं च गृहस्य पालकदेववास्तोष्पते: स्मरणं कृतवन्त: । श्रूयते ऋग्वेदे यथा-

वास्तोष्पते प्रति जानीह्यस्मान्त्स्वावेशो अनमीवो भवा न: ।
यत्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे ॥[6]

पुनश्च ऋग्वेदस्य वास्तोष्पतिसूक्तस्यानुशीलनेन ज्ञायते यत् वास्तोष्पतिनाम सरमा नाम देवशुने: कुलोद्भव: सारमेय नाम श्वानविशेष: । श्रूयते यथा-

यदर्जुन सारमेय दत: पिशङ्ग यच्छसे ।
वीव भ्राजन्त ऋष्टय उप स्रक्वेषु बप्सतो नि षु स्वप ॥[7]

अस्य मन्त्रस्यार्थो भवति- हे श्वेतवर्ण ! सरमावंशज ! पिङ्गलवर्ण वास्तोष्पते ! यस्मिन् काले त्वं दन्तान् दर्शयसि तस्मिन् काले अस्माकं समीपे आहारसमये ओष्ठप्रान्ते आयुधानि इव दन्ता: विशेषां शोभां धारयन्ति । सम्प्रति त्वं नितरां सुखेन निद्रां कुरु इति भाव: ।

अयं सारमेय: यत्र कुत्रापि गच्छति तस्मात् पुन: प्रत्यागच्छति, स: प्रत्यक्षरूपेण परोक्षरूपेण च धनं य: हरति तत्र गच्छति इति श्रूयते ऋग्वेदे।[8] नित्यवैरत्वात् सारमेय: सूकरस्य नाम वराहस्य विदारणं करोति कदाचित् वराहोऽपि सारमेयं विदारयति । जीवपुरुषा: इन्द्रस्य स्तुतिं कुर्वन्ति । अत: तेषां कृते सारमेयस्य भयं नास्तीति ऋग्वेदोक्ति:-

त्वं सूकरस्य दर्दृहि तव दर्दर्तु सूकर: ।
स्तोतॄनिन्द्रस्य रायसि किमस्मान्दुच्छुनायसे नि षु स्वप ॥[9]

सारमेयप्रसादात् गृहपालक: शयनं विदधातु , सर्वे बन्धुजना: निद्राधीना: भवन्तु , आसमन्तात् स्थिता: सर्वे जना: शयनं कुर्वन्तु इति प्रार्थना दृश्यते वास्तोष्पतिसूक्ते।[10] अपरेऽस्मिन् मन्त्रे निद्राया: कारणम् अम्भोनिधे: सकाशात् प्रगतिं प्राप्त: सूर्य: वर्तते इति ज्ञायते।[11] या: नार्य: अङ्गने शयनं कुर्वत्य: सन्ति , या: वाहने शयनं कुर्वत्य: सन्ति , या: तल्पे शयाना: सन्ति , या: पवित्रगन्धयुता: वर्तन्ते, ता: सर्वा: अपि नारी: वयं निद्रां कारयाम इति स्तोतार: कथयन्ति । श्रूयते यथा-

प्रोष्ठेशया वह्येशया नारीर्यास्तल्पशीवरी: ।
स्त्रियो या: पुण्यगन्धास्ता: सर्वा: स्वापयामसि॥[12]

अत्र उपसंहाररूपेण वक्तुं शक्नोमि यत् वास्तोष्पति: नाम गृहपालको देव: । यस्मिन् गृहे जना: निवसन्ति तेषां जनानां जीवनरक्षणं स्वास्थ्यरक्षणं समृद्धिरक्षणञ्च अस्य प्रथमकर्तव्य वर्तते। 'महाभाग्यात् देवताया एक आत्मा बहुधास्तूयते' इति निरुक्तवचनानुसारं श्वानरूपोऽयं देव: पितेव जनानां पालनं करोति पोषणञ्च करोति, अस्माकं धनस्य पशूनाञ्च वृद्धिमपि करोति ।

**संदर्भ ग्रन्थ : -**

1.ऋग्वेद: - ७/५४/२

2.मत्स्यपुराणम् – २५२/१४

3.निरुक्तम् – दशमोऽध्यायस्य द्वितीयपाद:

4.वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या । पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभि: सदा न:॥ ऋग्वेद: - ७/५४/३

5.अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन् । सखा सुशव एधि न: ॥ ऋग्वेद: - ७/५५/१

6.ऋग्वेद: - ७/५४/१

7.ऋग्वेद: - ७/५५/२

8.स्तेनं राय सारमेय तस्करं वा पुन:सर: । स्तोतॄनिन्द्रस्य रायसि किमस्मान्दुच्छुनायसे नि षु स्वप॥ ऋग्वेद: -७/५५/३

9.ऋग्वेद: -७/५५/४

10.सस्तु माता सस्तु पिता सस्तु श्वा सस्तु विश्पति: ।
ससन्तु सर्वे ज्ञातय: सस्त्वयमभितो जन: ॥
ऋग्वेद: -७/५५/५

11.सहस्रश्रृङ्गो वृषभो य: समुद्रादुदाचरत् ।
तेना सहस्येना वयं नि जनान्त्स्वापयामसि ॥ ७ ॥
ऋग्वेद: -७/५५/७

12.ऋग्वेद: -७/५५/७



Scanned by CamScanner